**संस्कृत-वार्ता:**

**दिनाङ्क :- 06.09.2024**

**सायम :- 06:20**

**<u>मुख्यवार्ता:</u>**

- प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य दृश्य-श्रव्य इति परान्तर्जालीय-माध्यमेन गुजरातस्य सूरतनगरे 'जल-सञ्चय:, जन-सहभागिता' इत्येतस्य पदक्षेपस्य शुभारम्भ: कृत:।

- केन्द्रेण कथितं यत् नौसेनाया: वायुसेनाया: राष्ट्रियापत्-प्रतिकारबलस्य च दलानि आन्ध्रप्रदेश- तेलङ्गाना-राज्ययो: च साहाय्योद्धारकार्येभ्य: नियोजितानि। अपरत्र केन्द्रीयमन्त्री शिवराज-सिंह: तेलङ्गाना-राज्यस्य खम्मम-नगरे जलाप्लावित-प्रभावितक्षेत्राणां नभ:स्थ-निरीक्षणम् विहितवान्।

- रुसदेशीय: राष्ट्रपतिः व्लादिमिर् पुतिन् प्रोक्तवान् यत् भारत-ब्राजील-चीनदेशा: युक्रेन्-द्वन्द्वस्य विषये सम्भाव्य-शान्ति-वार्तासु मध्यस्थरूपेण कार्यं कर्तुं शक्नुवन्ति।

- भाजपेतिदलेन जम्मूकश्मीरस्य विधानसभा-निर्वाचनाय निजघोषणा-पत्रम् प्रकाशितम्।

- पेरिस-नगरे पैरालिम्पिक-क्रीडासु प्रवीणकुमारः पुरुषाणाम् उच्चकूर्दनस्पर्धायां स्वर्णपदकं प्राप्तवान्।

--------------

**पीएम-जलसञ्चय**

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य दृश्य-श्रव्य इति परान्तर्जालीय-माध्यमेन गुजरातस्य सूरतनगरे 'जल-सञ्चय:, जन-सहभागिता' इत्येतस्य पदक्षेपस्य शुभारम्भ: कृत:। अयं पदक्षेप: प्रचलितस्य 'कैच द रेन' इति जल-शक्ति-अभियानस्य अनुरूपं वर्तते, य: दीर्घकालिकी जल-सुरक्षा सुनिश्चेतुं श्रीमोदिन: दृष्टे: पुष्टिकरोति। अस्मिन् अवसरे प्रधानमन्त्री मोदी उक्तवान् यत् जलसंरक्षणं न केवलं नीति: अपितु सामाजिक - प्रतिबद्धताया: विषयो अपि वर्तते। तेनोक्तं यत् इदं एकं प्रयासं पुण्यकार्यमपि स्त:। असौ कथितवान् यत् जलसंरक्षणं जीवनस्य प्रश्नो वर्तते, इदं मानवताया: भविष्यस्य जीवनम् अस्ति।

प्रधानमन्त्री स्व-प्रशासनेन जलजीवनोपक्रमं अटलभूजलयोजनां च समेत्य सतत-भविष्यस्य दिशि आरब्धानाम् उपक्रमाणाम् एकां शृङ्खलां प्रकाशितवान्। प्रधानमन्त्रिणा एतदपि कथितं यत् जलाभावस्य निवारणाय नूतनाभिनवानां प्रौद्योगिकीनां स्वीकरणस्य समयागत:। केन्द्रिय-जल-शक्ति-मन्त्री सी.आर. पाटिल: तथा गुजरातस्य मुख्यमन्त्री भूपेन्द्र-पटेल: सूरतनगरे राज्यव्यापि-जल-सञ्चय: जन-सहभागिता इत्येतस्य पदक्षेपस्य शुभारम्भं कृतवन्तौ। अस्य पदक्षेपस्य उद्देश्यं

सम्पूर्णेऽपि गुजराते प्राय: अष्टशताधिक-चतुर्विंशति-सहस्र-वृष्टिजल-सञ्चय-संरचनानां निर्माणं वर्तते।

**<u>तेलङ्गाना-जलाप्लाव</u>**

केन्द्रीय-कृषि-मन्त्री शिवराज-सिंह-चौहान: गृहराज्यमन्त्री बण्डी-सञ्जयकुमार: च तेलङ्गानाया: खम्ममजनपदे जलाप्लावप्रभावितेभ्य: जनेभ्य: सर्वसम्भव-साहाय्याय आश्वासनं प्रदत्तवन्तौ। मन्त्रिणौ खम्मम-जनपदे जलाप्लाव-प्रभावित-क्षेत्राणां नभ:स्थ-सर्वेक्षणं कृतवन्तौ। सहैव मन्त्रिणौ कृषिक्षेत्राणां परीक्षणम् अपि कृतवन्तौ, यत्र जलाप्लावेन सस्यानि विनष्टानि। राज्यस्य -कृषि-मन्त्री टी. नागेश्वर-राव: तथा राजस्वमन्त्री श्रीनिवास-रेड्डी केन्द्रीयमन्त्रिभ्यां सह आस्ताम्। एतन्मध्ये ऋतु-विभागस्य अधिकारिभि: केषुचित् जनपदेषु अतिवृष्टिकारणेन नारङ्गवर्णीय-सञ्चेतना प्रसारिता। आगामि चतुर्दिवसेभ्य: दशजनपदेभ्य: पीतवर्णीय-सञ्चेतना अपि प्रसारिता।

**<u>अमित शाह</u>**

केन्द्रीयगृहमन्त्री अमितशाह: जम्मू-नगरस्य द्विदिवसीय-यात्रासमये जम्मू-कश्मीर-विधानसभा-निर्वाचनम् आधृत्य भाजपेतिदलस्य घोषणापत्रस्य विमोचनेन सह निर्वाचन-प्रचारम् आरब्धवान्। श्रीशाह: भाजपा-दलस्य घोषणापत्रं प्राकाशयत्, यस्मिन् अस्य प्रदेशस्य दलस्य दूरदृष्टिः लक्ष्यानि च निर्दिष्टानि सन्ति। भाजपा-पक्षस्य घोषणा-पत्रस्य उद्घाटने जनसमूहं सम्बोधयन् अमितशाहः अवदत् यत् स्वातन्त्र्यात् आरभ्य जम्मू-कश्मीरम् अस्माकं दलस्य कृते महत्वपूर्णम्

अस्ति, तथा च सप्तत्यधिक-त्रिशत इति अनुच्छेदः अधुना इतिहासस्य भागः अस्ति, कदापि पुनः न भविष्यति इति सुदृढीकृतवान्।

## **<u>विरामः</u>**

**संस्कृतवार्तायाः संस्करणमिदम□ इदानीम□ आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले <u>www.newsonair.gov</u>.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।**

## **<u>जयशङ्कर</u>**

विदेशमन्त्री डॉ. एस्. जयशङ्करः अद्य नवदिल्ल्यां जापानस्य पूर्वप्रधानमन्त्रिणः शिञ्जो आबे इत्येतस्य पत्न्या अकी आबे इत्यनया सह मेलनं कृतवान् । सामाजिक-सञ्चार-पटले एकस्मिन् सन्देशे मन्त्रिणा लिखितं यत् अनेन मेलनेन सह शिञ्जो आबे इत्येतस्य तथा भारत-जापानयोः मैत्रीं प्रति तस्य प्रतिबद्धतायाः स्मृतिः पुनरुद्भूता। असौ अभिव्यक्तवान् यत् शिञ्जो आबे इत्येतस्य रणनीतिकदृष्टिः सर्वदा भारत-जापानयोः मध्ये सम्बन्धेषु निरन्तरं प्रगतये मार्गदर्शकस्य भूमिकां निर्वहति ।

**<u>अश्विनीवैष्णवः</u>**

सूचना-प्रसारण-प्रौद्योगिकमन्त्री अश्विनीवैष्णवः टोक्यो-नगरे जापान-देशस्य प्राविधिक-परिवर्तन-मन्त्रिणा तारो कोनो इत्यनेन सह उभयो: देशयोः मध्ये आङ्ककीय-सम्बन्धान् सुदृढीकर्तुं मेलनं कृतवान्। एतौ नेतारौ भविष्यकालिक-प्रौद्योगिकीय-प्रगतिं लक्ष्यीकृत्य, आङ्ककीय-भूदृश्ये सहयोगस्य नवान्वेषणस्य च मार्गान् अन्विष्टवन्तौ। श्रीवैष्णवः, भारत-जापान-संरचनागत-सहभागित्वस्य प्रगतिविषये चर्चां कर्तुं, जापान-बैंक-फ़ार्-इंटरनेशनल-कोपरेशन् इत्यस्य प्रबन्धनिदेशकेन अध्यक्षेण च तादाशी-मैदा इत्यनेन सहापि मिलितवान्।

**<u>पीयूषगोयल</u>**

वाणिज्योद्योग-मन्त्री पीयूषगोयल: प्रतिपादितवान् यत्, भारत-भूमध्यसागरीय-सम्बन्धम् अग्रे नेतुं अयमेव समयो विद्यते इति। नवदिल्ल्यां अस्य वर्षस्य भारत-भूमध्यसागरीय-व्यापार-सम्मेलने सम्बोधयन् सः भारत-भूमध्यसागरीय-राष्ट्रयोः मध्ये व्यापारेभ्यः महत्तर-सम्बन्धान् समाह्वयत्। भूमध्यसागरीय-देशैः वैश्विक-व्यापारस्य कृते प्रदत्तस्य मार्गस्य कृते श्रीगोयल: कृतज्ञतां अपि प्रकटितवान्। केन्द्रीयमन्त्री अभिव्यक्तवान् यत् भारते पर्यटनस्य बहव्य: अवसरा: सन्तीति।

**<u>जम्मू-कश्मीर</u>**

जम्मूकश्मीरे विधानसभा-निर्वाचनस्य द्वितीयचरणाय अद्य नामाङ्कनपत्राणां परीक्षणं भवति। द्वितीयचरणाय आहत्य दशाधिक-त्रिशत-प्रत्याशिन: नवविंशत्यधिक-त्रिशत-नामाङ्कनपत्राणि माङ्कितानि।

हृय: नामाङ्कन पत्र-प्रपूरणस्य अन्तिमो दिवस: आसीत्। सोमवासरे नामाङ्कनपत्रस्य प्रत्यावर्तनाय अन्तिम: दिवस: वर्तते। अस्य मासस्य पञ्चविंशतिदिनाङ्के द्वितीयचरणस्य षट्-जनपदानां षड्विंशति-विधानसभासनानां मतदानं भविष्यति।

**<u>राष्ट्रपति व्लादिमिर</u>**

रुसदेशीय: राष्ट्रपतिः व्लादिमिर् पुतिन् प्रोक्तवान् यत् भारत-ब्राजील-चीनदेशा: युक्रेन्-द्वन्द्वस्य विषये सम्भाव्य-शान्ति-वार्तासु मध्यस्थरूपेण कार्यं कर्तुं शक्नुवन्ति इति। ईस्टर्न्-इकनामिक्-फ़ोरम् इत्यस्य पूर्णसम्मेलनम् अभिसम्बोधयन् रूसदेशस्य राष्ट्रपतिः अवदत् यत् भारतस्य, ब्राजील्-देशस्य चीन-देशस्य च नेतारः युक्रेन्-देशस्य स्थितिं परिहर्तुं योगदानं प्रदातुं च पूर्णनिष्ठापूर्वकं प्रयतन्ते। श्रीपुतिन: अग्रे अकथयत्, यत् असौ युक्रेन्-संघर्षस्य विषये त्रिभिः देशैः सह सततं सम्पर्के अस्ति।

**<u>विनेश-बजरङ्ग</u>**

हरियाणा-विधानसभा-निर्वाचनात् प्राक् बजरङ्ग-पुनिया विनेश: ोगाट् च अद्य दलस्य महासचिवस्य के.सी. वेणुगोपालस्य अथ च दीपक-बावरिया इत्येतस्य उपस्थितौ काङ्ग्रेसदले सम्मिलितौ जातौ।

अस्मिन् अवसरे सुश्री □ोगाट् उक्तवती यत् असौ काङ्ग्रेस-दले सम्मिलिता यतोहि एतत् दलं महिलाभि: साकं अस्ति, तासां सङ्घर्षावधौ तासां समर्थनं करोति।

**<u>मल्लयुद्धक्रीडा</u>**

मल्लयुद्धक्रीडायां ज्योति-बेरवाल् इत्येषा स्पेन्-देशस्य पोण्टेवेद्रा-नगरे आयोजितायां यू-20 विश्व-चैम्पियन्शिप्-इति क्रीडायां महिलानां षड्सप्तति-किलोग्राम -मितभारवर्गे फ्रीस्टाइल् इत्येतस्मिन् वर्गे स्वर्णपदकं प्राप्तवती। ज्योतिः ह्यः अन्तिमस्पर्धायां युक्रेन्-देशस्य मारिया ओर्लेविच् इत्येतां पराजितवती, एकमपि अङ्कं प्राप्तुं अवसरं न दत्वा इमां उपाधिम् प्राप्तवती। अपरत्र अन्तिमं स्थानं प्रति गच्छन्ती ज्योतिः मङ्गोलियन्-चीन-तुर्की-प्रतिद्वन्द्वीन: पराजितवती।

**।। इति वार्ताः।।**